श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री यदुगिरिनायिका सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Dr. Sri. R. Thirunarayanan of Srirangam and Ms. V. Vismaya of Melukote for their help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री यदुगिरिनायिका सुप्रभातम् ॥

श्रीयादवक्षितिभृदीशविशालवक्षः
सौढान्तरोज्ज्वलमनोहरदिव्यमूर्ते।
क्षीराम्बुधिप्रियसुते ! प्रणतेष्टदात्रि !
यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ १ ॥

कल्याणतीर्थमवगाह्य सुतीर्थपूर्ण-
सौवर्णभद्रकलशान् शिरसा वहन्तः।
तिष्ठन्ति वैदिकशिखामणयः प्रहृष्टा
यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ २ ॥

एतेऽपि नारदमुखास्सुरवैणिकाश्च
त्वत्पादपङ्कजविलीननिजान्तरङ्गाः।
गायन्ति ते गुणगणान्निगमान्तगम्यान्
यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ३ ॥

इन्द्रानलान्तकमुखाश्च दिशामधीशाः
सम्प्रापितोन्नतपदास्त्वदपाङ्गलेशैः।
त्वां संस्तुवन्ति विहिताञ्जलयः प्रकामं
यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ४ ॥

देवि ! त्वया सुचरितस्य सुते प्रसादा-
द्यादृग्विधाः प्रकटिताः करुणातरङ्गाः।
तादृग्विधानिह तरङ्गय मय्यपाङ्गान्
यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ५ ॥

यैरुन्नतिं समगमन्न च शङ्कराद्याः
यानीहते हरिरपि त्रिजगद्विधाने।

www.prapatti.com

मातस्त्वमद्य समुदञ्चय तानपाङ्गान्
    यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ६॥

सद्यः प्रफुल्लकरपद्मगळन्मधूल-
    पानोन्मुखा मधुकरास्तव सुप्रभातम्।
शंसन्ति झङ्कृतिमिषेण किलाद्य देवि !
    यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ७॥

कर्णावतंसितसरोजयुगे प्रफुल्ले
    सद्यस्समुन्मिषदपाङ्गपरम्परास्ते।
निष्पन्दपुष्टरसपानरताळिमाला-
    लीलां वहन्ति कमले तव सुप्रभातम्॥ ८॥

दारिद्र्यदावदहनान्तरतप्यमान-
    खेदापनोदनधुरीणकटाक्षपूरे !।
उत्फुल्लपङ्कजदळायतलोचनान्ते
    यद्वद्रिनाथदयिते ! तव सुप्रभातम्॥ ९॥

जयतु जयतु देवी देवसङ्घादिपूज्या
    जयतु जयतु पद्मा पद्मसद्माऽभिवन्द्या।
जयतु जयतु नित्या निर्मलज्ञानवेद्या
    जयतु जयतु सत्या सर्वभूतान्तरस्था॥ १०॥

सुप्रभातमिदमप्रमत्तधीः
    यः प्रभातसमये पठेन्नरः।
क्षिप्रमेति सकलानभीप्सितान्
    दीर्घमायुरथ शाश्वतं पदम्॥ ११॥

स्वामी सुशीलस्सुलभस्सर्वज्ञस्सर्वशक्तिधृत्।
वत्सलो यत्सहायस्तां वन्दे यदुगिरीश्वरीम्॥ १२॥

॥ इति श्री यदुगिरिनायिका सुप्रभातं समाप्तम्॥

www.prapatti.com